मुग्धबोधमतम् ॥ (यथा, श्रीमद्भागवते ।५।१३।८।
"पदे पदेऽभ्यन्तरवह्निनार्द्दितः
कौटुम्बिकः क्रुध्यति वै जनाय" ॥)

कौड़विकं, त्रि, (कुड़वस्य वापः। "तस्य वापः" । ५ । १ । ४५ । इति ठञ् ।) कुड़वपरिमितवीजवपनयोग्यक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौणपः, पुं, (कुणपस्थिधातुकं शरीरं शवो वा तं भक्षयितुं शीलमस्य । इत्यण् ।) राक्षसः। इत्यमरः । १ । १ । ६२ ॥ (यथा, महाभारते । १ । १७१ ।१४ ।
"न कौणपाः शृङ्गिणो वा न च देवाश्च नखगाः"॥
वासुकिवंशोद्भवः सर्पविशेषः। यथा, महाभारते । १ । ५७ । ५ ।
"पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः।
हिरण्यबाहुः शरणः कक्षकः कालदन्तकः।
एते वासुकिजा नागाः प्रविष्टा हव्यवाहने" ॥)

कौणपदन्तः, पु, (कौणपस्य दन्ता इव दन्ता अस्य ।) भीष्मः । इति त्रिकाण्डशेषः ॥

कौण्डिन्यः, पुं, (कुण्डिनस्य स्वनामख्यातमुनिविशेषस्य गोत्रापत्यं इति । गर्गादित्वात् यञ् ।) कुण्डिनमुनिपुत्रः । तत्पर्य्यायः । विष्णुगुप्तः २ । इति त्रिकाण्डशेषः ॥

कौतुकं, क्ली, (कुतुक + प्रज्ञादित्वात् स्वार्थे अण् । कुतुकस्य भावः इति युवादित्वात् अण् वा ।) कुतूहलम् इत्यमरः । १ । ७ । ३१ ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३६४ ।
"चक्रतुः कौतुकोद्ग्रीवां सभां चित्रार्पितामिव ॥)
अभिलाषः । (यथा, कथासरित्सागरे ।
"पश्यन्त्यास्तं नृपं तस्या लज्जाकौतुकयोर्द्दृशि ।
अभूदन्योन्यसंमर्द्दो रचयन्त्या गतागतम्" ॥)
उत्सवः । (यथा, भागवते । ४ । ३ । १३ ।
"कथं सुतायाः पितृगेहकौतुकं
निशम्य देहः सुरवर्य्य! नेङ्गते" ॥)
नर्म्म । हर्षः । (यथा, भागवते । १ । १७ । २५ ।
"इयञ्च भूर्भगवता न्यासितोरुभरा सती ।
श्रीमद्भिस्तत्पदन्यासैः सर्व्वतः कृतकौतुका" ॥)
परम्परायातमङ्गलम् । विवाहसूत्रम् । (यथा, कुमारे । ७ । २ ।
"वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रीवर्गम्" ॥)
गीतादिभोगः । इति मेदिनी ॥ गीतादिः । भोगकालः । इति हेमचन्द्रः ॥

कौतूहलं, क्ली, (कुतूहलस्य भावः कर्म्म वा युवादित्वात् अण् । यद्वा, कुतूहलमेव इति प्रज्ञाद्यण् ।) कुतूहलम् । अपूर्व्ववस्तुदिदृक्षाद्यतिशयः । इत्यमरः । १ । ८ । ३१ । (यथा, मार्कण्डेये । ८ । १ ।
"भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्रमात् ।
महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" ॥)

कौदालिकः, पुं, (कुं भूमिं दारयतीति । कुदारः । तेन चरतीति ठक् न रलयोरैक्यात् रस्य लत्वम् ।) कुदालिकः ततः स्वार्थे अण् ।) वर्णसङ्करजातिविशेषः । स तु रजक्यां तीवराज्जातः ।

इति ब्रह्मवैवर्त्तपुराणम् ॥

कौद्रविकं, क्ली, (कोद्रवं तत् निमित्तमस्य इति ठञ् ।) सौवर्च्चललवणम् । इति राजनिर्घण्टः ॥

कौद्रवीणं, त्रि, (कुत्सितं यथा तथा द्रवति इति । पृषोदरात् सिद्धे कोद्रवं कुत्सितधान्यभेदः तस्य भवनं उत्पत्तिस्थानं । "धान्यानां भवने क्षेत्रे खञ्"। ५।२।१। इति खञ् ।) कोद्रवधान्योद्भवयोग्यक्षेत्रम्। इत्यमरः। २ । ९ । ८ । कोदोर क्षेत इति भाषा ॥

कौन्तिकः, पुं, (कुन्तास्त्रेण प्रासेन युध्यते। कुन्तः प्रासः प्रहरणमस्येति वा। ठञ् ।) प्रासिकः । प्रासास्त्रधारी योद्धा । इत्यमरः । २ । ८ । ७० ॥

कौन्ती, स्त्री, (कुन्तिषु देशविशेषेषु भवा। "तत्रभवः"॥ ४ । ३ । ५३ । इति अण् । ततो ङीप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥
(अस्याः पर्य्यायाः यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्त्री स्मृता कौन्ती हरेणुका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥
पर्य्यायान्तरञ्च यथा,—
"हरेणु रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी" ॥
इति वैद्यकरत्नमालायाम् । गुणाश्चास्या रेणुकाशब्दे बोद्धव्याः ॥)

कौन्तेयः, पुं, (कुन्त्या अपत्यं इति ढक् ।) कुन्तीपुत्रः । स तु युधिष्ठिरादिः । इति महाभारतम् ।
(यथा, भगवद्गीतायाम् । २ । ३ ।
"मा क्लैब्यं गच्छ कौन्तेय ! नैतत्त्वय्युपपद्यते" ॥)
अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥

कौपं, क्ली, (कूपे भवं कूपस्येदं वा इत्यण् ।) कूपोदकम् । अस्य गुणाः यथा,—
"कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु।
तच्चेत् क्षारं कफवातघ्नं दीपनं पित्तकृत् परम्" ॥
इति भावप्रकाशः ॥ (सुश्रुतोक्ता गुणा यथा,—
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु" ॥
कौपसलिलसेवने कालनिर्द्देशः । यथा, तत्रैव ।
"वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेऽप्येवम्" ॥)

कौपीनं, क्ली, (कूपपतनमर्हतीति । "शालीनकौपीने अधृष्टाकार्य्ययोः"। ५ । २ । २० । इति साधुः ।) पापम् । तत्साधनत्वात् तद्वद्गोप्यत्वात् पुरुषलिङ्गमपि । तत्सम्बन्धात् तदाच्छादनमपि । इति सिद्धान्तकौमुदी ॥ अकार्य्यम् । गुह्यदेशः । इत्यमरः ॥ चीरम् । इति मेदिनी ॥ तत्तु मेखलाबद्धपरिधेयवस्त्रखण्डम् । कपिनी इति भाषा । तत्पर्य्यायः । कच्छा २ कच्छटिका ३ कक्षा ४ घटी ५ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ७ । १३ । २ ।
"विभृयाद् यद्यसौ वासः कौपीनाच्छादनं परम्" ॥)

कौपोदकी, स्त्री, (कौमोदकी इति पृषोदरादित्वात् मस्य पत्वम् ।) कौमोदकी । इति भरतो द्विरूपकोषश्च ॥

कौमारं, क्ली, (कुमारस्य कर्म्म भावो वा । वयोवचनत्वादण् ।) कुमारावस्था ।
("जातः कुं पृथिवीं पद्भ्यां मारयेत् तत्कुमारकः ।
इति प्रमाणतो विद्धि कौमारं प्राग्भवाब्दतः" ॥
इत्युक्तावधिके "कौमारं पञ्चमावधि"। इत्यन्ते वयोवस्थाभेदे। सा तु जन्मावधिपञ्चमवर्षपर्य्यन्ता। इत्यर्थः ॥) तन्त्रमते षोड़शवर्षपर्य्यन्ता । (यथा, भगवद्गीतायाम् । २ । १३ ।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति" ॥
पुं, कुमारस्य सनत्कुमारस्य इदं अण् सृष्टिभेदः । यथा, "कौमार आर्षः प्राजापत्यो मानव इत्यादि सर्गनामानि" । इति श्रीधरः । तथा च भागवते । १ । ३ । ६ ।
"स एव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्" ॥)
तद्वति पुं, स्त्री। इति शब्दमाला ॥ अपूर्व्वपतिं कुमारीं पतिरुपपन्नः "कौमारापूर्व्ववचने । ४ । २ । १३ । इति द्वितीयान्तादुपयन्तर्य्यर्थेऽण्प्रत्ययेन साधुः ॥ अपूर्व्वपतिकुमारीपतिः । इति सिद्धान्तकौमुदी ॥)

कौमारी, स्त्री, मातृकाविशेषः । सा तु कार्त्तिकेयशक्तिः । इति शब्दमाला ॥ यथा,—
"कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ८१ । १६ ॥
(अपूर्व्वपतिः कुमारी पतिमुपपन्ना । "कौमारापूर्व्ववचने" । ४ । २ । १३ । इति स्वार्थे अण् प्रत्ययेन साधुः ततो ङीप् । अपूर्व्वभार्य्यकुमारपत्नी । यथा, भट्टौ । ७ । ९० ।
"उपलब्धागमयशक्तः कौमारीं पततांवर" ! ॥
पञ्चमवर्षीया बालिका । कौमारी अवस्था । यथा, भागवते । ३ । २ । २८ ।
"कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयो व्रजौकसाम्" ॥)
वाराहीकन्दः । इति राजनिर्घण्टः ॥

कौमुदः, पुं, (कौ पृथिव्यां मोदन्ते जना यस्मिन् । मुद् + कः । सप्तम्या अलुक् ।) कार्त्तिकमासः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।
"एतैरन्यैश्च राजेन्द्रैः पुरा मांसं न भक्षितम् ।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः ॥
कौमुदन्तु विशेषेण शुक्लपक्षं नराधिपः ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥)

कौमुदिका, स्त्री, (कौमुदी + संज्ञायां कन् ततो ह्रस्वः टाप् च ।) उमासखीविशेषः । इति शब्दमाला ॥ (स्वार्थे कन् ह्रस्वः टाप् च । ज्योत्स्ना । त्रि, चतुरर्थ्यां कुमुदादित्वात् ठक् । कौमुदिकः । कुमुदाख्यपर्व्वतसन्निकृष्टदेशविशेषः ॥)

कौमुदी, स्त्री, (कुमुदस्य इयं प्रकाशकत्वात् "तस्येदं"। ४ । ३ । १२० । इत्यण् ततो ङीप् ।) ज्योत्स्ना । इत्यमरः । १ । ३ । १६ । (यथा, कुमारे । ४ ३३ ।
"शशिना सह याति कौमुदी ॥
सह मेघेन तड़ित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि" ॥)
उत्सवः । इति धरणी । (यथा, महाभारते १३ पर्व्वणि ।